Total No. of Printed Pages—8

58

**6 SEM TDC SNS M 4**

**2019**

( May )

SANSKRIT

( Major )

Course : 604

*Full Marks* : 80

*Pass Marks* : 32/24

*Time* : 3 hours

*The figures in the margin indicate full marks for the questions*

UNIT—I

**( Ketakīkāvyam, Taraṅga—I )**

1. Answer the following questions as directed : 1×5=5

(a) How many verses are there in the 1st Taraṅga of the *Ketakīkāvyam* ?

(b) Ketakī is a migratory / needle beaked / long necked bird.

( Choose the correct one )

*(c)* In which year *Ketakīkāvyam* was translated to Sanskrit by मनोरञ्जनशास्त्री?

*(d)* By which name was the poet of the Assamese poem, *Ketakī* known?

*(e)* Write the Sanskrit equivalent word of विहगः.

**2.** Write the description of Ketakī as you find in the *Ketakīkāvyam*. 10

**3.** Translate into English *or* Assamese any *three* of the following verses : 5×3=15

*(a)* त्वया सुराणामपि दुर्लभं धनं
किमाहृतं कस्य कृते प्रदास्यते।
अथ प्रशस्तं यदिहास्ति वस्तु तत्
किं नाम देशं प्रति नेतुमिष्यते॥

*(b)* जानासि किं पक्षिणि, रम्यकानने
मायामये त्वं रमसेऽत्र मोहने।
मायाविनो मायिकवेशधारिणो
दद्यर्गले ते ननु पाशबन्धनम्॥

*(c)* कस्य प्रवृत्तिदयिते, त्वयाऽहृता,
केनाथ वाक्यं समुदाहरिष्यते।
त्वदीयवाणीं, हृदयं यया द्रवेत्,
निशम्य तां चित्तमथो व्यथाकुलम्॥





*(d)* अचेतनोऽहं खलु मोह निद्रया
निमज्जितोऽभूवमवोधवारिधौ।
किं नामगीतेन ततः प्रबोधितो
ममान्तरात्मा कथमाकुलीकृतः॥

## UNIT—II

### ( Jayamatīkāvyam, Pravāha—III )

**4.** Answer the following questions as directed : 1×4=4

*(a)* What is the name of the other poetic composition of Bhavadeva Bhāgavatī?

*(b)* How many verses are there in the 3rd Pravāha of *Satī Jayamatīkāvyam*?

*(c)* Who was Gadāpāṇi?

*(d)* Write the Sanskrit equivalent word of सचिवः.

**5.** Write a note on the dialogue between Jayamatī and Gadāpāṇi in disguise. 6

6. Translate into English *or* Assamese any *two* of the following verses : 5×2=10

(a) अयोग्यभूमौ वपनं कृषीवलः
करोति चेत्तत्र वृथा हि पौरुषम्।
कृतं हि तादृक् सचिवैः सुदुर्म्मदै-
र्दधाति कीदृक् कुफलं विलोक्यताम्॥

(b) इदम्विभाव्य सुतदर्शनेच्छया
जगाम वीरः सहसा निजालयम्।
विलोक्य चासौ वदने सरोजके
चुचुम्ब पुत्रौ स्मितहास्यकान्तकौ॥

(c) नृपालदण्डो यदि लभ्यते मया
नगण्य एष त्यज वाहुविक्रमम्।
न वच्मि पत्युर्व्विषयेष्विति स्थिरम्
जानीहि राजनिति साप्यभाषत॥

## UNIT—III

### ( Praśasti )

7. Answer the following questions as directed : 1×3=3

(a) From which book is the 'Praśasti of Śaṅkaradeva' taken?

(b) Who was the writer of the प्रशस्ति of Ānandarāma Boruah?





(c) How many Ślokas are there in the प्रशस्ति of 'Mukunda Madhava Sarmah'?

8. Write a note on the Praśasti of आनन्दराम बरुवा as stated in your textbook, 'प्रशास्तिमालिका'. 9

9. Translate into English *or* Assamese any *two* of the following : 4×2=8

(a) न केवलं धर्मप्रवर्तको भुवि
न चापि काव्यग्रथनाद्धि गीयते।
अशेषपुण्यैरसमस्य वस्तुतो
मनुष्यरूपः स्वयमेव देवता॥

(b) शान्ताकारः सदा वन्द्यः स्मेरमुखः सवत्सलः।
जायतेऽक्षयकीर्त्तिश्च समस्ते क्षितिमण्डले॥
मया कृतप्रशंसेन नास्ति तव प्रयोजनम्।
तव कीर्त्तिर्भुवं त्यक्त्वा विहायसि च गच्छति॥

(c) लौहित्यस्योत्तरस्यां हि रजादुवारनामके।
तथोत्तरगुवाहाट्यं जायते च महाञ्जनः॥
गर्गरामः पिता यस्य माता च दुर्लभेश्वरी।
बरुवानन्दरामश्च मजिन्दारकुले भवः॥

## UNIT—IV

## ( Comprehension )

**10.** Read any *one* of the following passages and answer the questions given below in Sanskrit :

(a) आसीत् कल्याणकटकवास्तव्ये भैरवो नाम व्याधः। स एकदा मृगमन्विष्यन् विन्ध्याटवीं गतवान्। ततस्तेन व्यापादितं मृगमादाय गच्छता घोराकृतिः शूकरो दृष्टः। तेन व्याधेन मृगं भूमौ निधाय शूकरः शरेणाहतः। शूकरेणापि घनघोरगर्जनं कृत्वा स व्याधो वस्तिदेशे हतः सन् छिन्नद्रुम इव भूमौ निपपात। अथ तयोः पादास्फालनेन सर्पोऽपि मृतः। अनन्तरं दीर्घरावो नाम जम्बुकः परिभ्रमन्नाहारार्थी तान् मृतान् मृगव्याधसर्पशूकरान् अपश्यत्। अचिन्तयच्च—अहो, अद्य महद्भोज्यं मे समुपस्थितम्—

मासमेकं नरो याति द्वौ मासौ मृगशूकरौ।
अहिरेकं दिनं याति अद्य भक्ष्यो धनुर्गुणः॥

प्रश्नाः —

(i) व्याधस्य नाम किम्? 1

(ii) स कुत्र गतवान् किमर्थञ्च? 2

(iii) 'शूकरः'-शब्दस्य कोऽर्थः? 1

(iv) 'अहि'-शब्दस्य समार्थक-शब्दद्वयं लिखतु। 2





6)

(v) जम्बुकस्य नाम किमासीत्? 1

(vi) कदा जम्बुकः मृतान् मृगव्याधसर्पशूकरान् अपश्यत्? 1

(vii) कथाभागस्य शिरोनाम लिख्यताम्। 2

(b) प्रेक्षणार्थकाद् दृश्धातोः अनट्-प्रत्यये कृते दर्शनशब्दो निष्पद्यते। किं नाम दर्शनम्? दृश्यते अनेन इति दर्शनम्। येन साधनेन इदं विश्वम् इदं वस्तुजातं ब्रह्म, जीवात्मा प्रकृतिश्च यथातथ्येन दृश्यते निरीक्ष्यते परीक्ष्यते समीक्ष्यते विविच्यते च तद् दर्शनम्। अतः समग्रमपि आध्यात्मिकम् आधिभौतिकं च विवेचनं दर्शनशब्दान्तर्गतं भवति। ब्रह्म किम्? तस्य किं स्वरूपम्? कः ईश्वरः? अस्मिन् जगति किं शाश्वतं तत्त्वम्? इयं सृष्टिः कुत आबभूव? ...इत्यादयोऽनुयोगा यत्र सुसूक्ष्मेण रूपेण विविच्यन्ते तद् दर्शनम्।

भारतीयदर्शनानि स्थूलरूपेण द्विधा विभज्यन्ते—आस्तिकदर्शनानि नास्तिकदर्शनानि च। यानि दर्शनानि वेदानां प्रामाण्यं स्वीकुर्वन्ति तानि आस्तिकदर्शनानि इति व्यवह्रियन्ते। यानि च वेदानां प्रामाण्यं न स्वीकुर्वन्ति तानि नास्तिकदर्शनानि। तत्र न्याय-वैशेषिक-सांख्य-योग-मीमांसा वेदान्ताख्यानि षड्दर्शनानि आस्तिकदर्शनानि अभिधीयन्ते। चार्वाक-बौद्ध-जैनदर्शनानि च नास्तिकदर्शनानि निर्दिश्यन्ते। विभाजनं चैतद् वेदानां प्रामाण्याप्रामाण्यमूलकमेवेति सम्यग् अवधारणीयम्।

प्रश्नाः —

(i) दर्शनशब्दस्य व्युत्पत्तिः लिख्यताम्। 1

*(ii)* किं नाम दर्शनम्? 2

*(iii)* भारतीयदर्शनस्य भागद्वयं किम्? 2

*(iv)* आस्तिकनास्तिकयोः विभाजनस्य का भित्तिः? 2

*(v)* आस्तिकसम्प्रदायान्तर्गतानां दर्शनसम्प्रदायानां नामानि लिख्यन्ताम्। 3

★★★